# Sharabhastotram by Shri Nrisimha from Lingapurana

# લિઙ્ગપુરાણોક્તં શ્રીનૃસિંહકૃત શરભસ્તોત્રમ્

## Document Information

Text title : Sharabhastotram by Shri Nrisimha from Lingapurana

File name : sharabhastotram.itx

Category : shiva, aShTottarashatanAma

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan Iyer shivakumar24 gmail.com

Proofread by : Sivakumar Thyagarajan Iyer, PSA Easwaran, Ruma Dewan

Description/comments : Also in Askashabhairavatantra adhyAyaH 79. See corresponding nAmAvalI.

Latest update : March 27, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 28, 2023

*sanskritdocuments.org*

# લિઙ્ગપુરાણોક્તં શ્રીનૃસિંહકૃત શરભસ્તોત્રમ્

ॐ શ્રીગણેશાય નમઃ ।

અથ આકાશતન્ત્રે એકોનાશીતિતમોઽધ્યાયઃ

શરભાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીશિવ ઉવાચ -

અસ્ય શ્રીશરભાષ્ટોત્તરશતનામમહામન્ત્રસ્ય યોગાનન્દ ઋષિઃ

અનુષ્ટુપ્છન્દઃ શ્રીમદઘોરવીરશરભેશ્વરો દેવતા,

ખં બીજમ્, સ્વાહાશક્તિઃ, ફટ્ કીલકમ્,

શ્રીમચ્છરભસાલુવાષ્ટોત્તરશતનામ સિદ્ધ્યર્થે જપે વિનિયોગઃ ।

ધ્યાનમ્ -

અષ્ટાઙ્ઘ્રિશ્ચ સહસ્રબાહુરનલચ્છાયા શિરોયુગ્મધૃગ્-
    યસ્ત્ર્યક્ષો દ્વિખુપુચ્છઉદિતઃ સાક્ષાન્નૃસિંહાસનઃ ।
અર્ધેનાપિ મૃગાકૃતિઃ પુનરથાપ્યર્ધેન પક્ષ્યાકૃતિઃ
    શ્રી વીરઃ શલભઃ સ પાતુ શલભશ્ચિન્ત્યઃ સદા માં હૃદિ ॥

શ્રીનૃસિંહ ઉવાચ -

(સદાશિવોગ્રરૂપાય પક્ષવિક્ષિપ્તભૂભૃતે ।)

નમો રુદ્રાય શર્વાય મહાગ્રાસાય જિષ્ણવે ॥ ૧॥ (રૌદ્રાય, મહોગ્રાસાય, વિષ્ણવે)

નમ ઉગ્રાય ભીમાય નમઃ ક્રોધાય મન્યવે । (ક્રુદ્ધાય)
નમો ભવાય શર્વાય શઙ્કરાય શિવાય તે ॥ ૨॥

કાલકાલાય કાલાય મહાકાલાય મૃત્યવે ।
વીરાય વીરભદ્રાય ક્ષયદ્વીરાય શૂલિને ॥ ૩॥

મહાદેવાય મહતે પશૂનાં પતયે નમઃ ।
એકાય નીલકણ્ઠાય શ્રીકણ્ઠાય પિનાકિને ॥ ૪॥

નમોઽનન્તાય સૂક્ષ્માય નમસ્તે મૃત્યુમૃત્યવે । (મૃત્યુમન્યવે)

પરાય પરમેશાય પરાત્પરતરાય તે ॥ ૫॥ (તત્પરાય પરમાત્મને)

પરાપરાય વિશ્વાય નમસ્તે વિશ્વમૂર્તયે । (પરાત્પરાય, વિશ્વમૂર્ત્તયે)
નમો વિષ્ણુકલત્રાય વિષ્ણુક્ષેત્રાય ભાનવે ॥ ૬॥

કૈવર્તાય કિરાતાય મહાવ્યાધાય શાશ્વતે । (વૈકર્તાય)
ભૈરવાય શર્વાય શરણ્યાય મહાભૈરવરૂપિણે ॥ ૭॥ (શરવ્યાય)

નમો નૃસિંહસંહર્ત્રે કામકાલપુરારયે । (કાલકાલપુરાયે)
મહાપાશૌઘસંહર્ત્રે વિષ્ણુમાયાન્તકારિણે ॥ ૮॥ (કર્મપાશૌઘસંહર્ત્રે, નમઃ પાશૌઘસંહર્ત્રે)

ત્ર્યમ્બકાય ત્ર્યક્ષરાય શિપિવિષ્ટાય મીઢુષે । (ત્ર્યક્ષાયચ)
મૃત્યુઞ્જયાય શર્વાય સર્વજ્ઞાય મખારયે ॥ ૯॥ (રુદ્રાય સર્વજ્ઞાય)

મખેશાય વરેણ્યાય નમસ્તે વહ્નિરૂપિણે । (ખખોલ્કાય, વાગ્ભિરેતસે, વહ્નિરેતસે)
મહાઘ્રાણાય જિહ્વાય પ્રાણાપાનપ્રવર્ત્તિને ॥ ૧૦॥ (મહાપ્રાણાય દેવાય)

ત્રિગુણાય ત્રિશૂલાય ગુણાતીતાય યોગિને ।
સંસારાય પ્રવાહાય મહાયન્ત્રપ્રવર્તિને ॥ ૧૧॥ (સંસારચક્રવાહાય, સંસારયન્ત્રવાહાય)

નમશ્ચન્દ્રાગ્નિસૂર્યાય મૂર્તિવૈચિત્ર્યહેતવે । (તમસ્વિદ્વ્યોમસૂર્યાય, મુક્તિવૈચિત્રહેતવે , મુક્તિવૈચિત્ર્યહેતવે)
વરદાયાવતારાય સર્વકારણહેતવે ॥ ૧૨॥ (વરદાય વિકારાય)

કપાલિને કરાલાય પતયે પુણ્યકીર્ત્તયે । (પુણ્યકીર્તયે , પુણ્યમૂર્તયે)
અઘોરાયાગ્નિનેત્રાય લકુલીશાય શમ્ભવે ॥ ૧૩॥ (અમોઘાયાગ્નિનેત્રાય, નકુલીશાય , અકુલીશાય)

ભિષક્તમાય ચણ્ડાય દણ્ડિને ઘોરરૂપિણે । (ભીષામ્બરાય મુણ્ડાય દણ્ડિને યોગરૂપિણે)
મેઘવાહાય દેવાય પાર્વતીપતયે નમઃ ॥ ૧૪॥

અવ્યક્તાય વિશોકાય સ્થિરાય સ્થિરધન્વને । (અવ્યક્તાયાપ્યશોકાય)
સ્થાણવે કૃત્તિવાસાય નમઃ પઞ્ચાર્થહેતવે ॥ ૧૫॥

વરદાયૈકપાદાય નમશ્ચન્દ્રાર્ધમૌલિને । (વિરજાયૈકપાદાય નમશ્ચન્દ્રાર્ધમૌલયે)
નમસ્તેઽધ્વરરાજાય વયસાં પતયે નમઃ ॥ ૧૬॥

યોગીશ્વરાય નિત્યાય સત્યાય પરમેષ્ઠિને । (પરમાત્મને)
સર્વાત્મને નમસ્તુભ્યં નમઃ સર્વેશ્વરાય તે ॥ ૧૭॥ (સર્વસ્વરાય)

એકદ્વિત્રિચતુઃ પઞ્ચકૃત્વસ્તેઽસ્તુ નમો નમઃ ।
દશકૃત્વસ્તુ સાહસ્રકૃત્વસ્તે ચ નમો નમઃ ॥ ૧૮॥
(દશકૃત્વઃ શતકૃત્વઃ સહસ્રકૃત્વો નમો નમઃ ॥ (આસહસ્રં નમો નમઃ )

નમો પરિમિતં કૃત્વાનન્તકૃત્વો નમો નમઃ । (કૃત્વોઽનન્તકૃત્વો)
નમો નમો નમો ભૂયઃ પુનર્ભૂયો નમો નમઃ ॥ ૧૯॥
(નમો પરિમિતેકૃત્વો નમઃ કૃત્વો નમો નમઃ ।
(નમો ભૂયો નમો ભૂયો પુનર્ભૂયો નમો નમઃ ॥)
સૂત ઉવાચ -
નામ્નામષ્ટશતેનૈવ સ્તુત્વાઽમૃતયે ન તુ ।
પુનસ્તુ પ્રાર્થયામાસ નૃસિંહં શરભેશ્વરમ્ ॥ ૨૦॥

યદા યદા મમાજ્ઞાનમત્યહઙ્કારદૂષિતમ્ ।
તદા તદાઽપનેતવ્યં ત્વયૈવ પરમેશ્વરઃ ॥ ૨૧॥

એવં વિજ્ઞાપયન્પ્રીતઃ શંકરં નરકેસરી ।
નન્વશક્તો ભવાન્વિષ્ણો! જીવિતાન્તં પરાજિતઃ ॥ ૨૨॥

તદ્વક્ત્રશેષમાત્રાન્તં કૃત્વા શર્વસ્ય વિગ્રહમ્ ।
શુક્તિશિત્યં તદામઙ્ગં વીરભદ્રઃ ક્ષણાત્તતઃ ॥ ૨૩॥

ઇતિ લિઙ્ગપુરાણોક્તં શ્રીનૃસિંહકૃતં શરભસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ લિઙ્પુરાણમ્ । પૂર્વભાગઃ । અધ્યાયઃ ૯૬। ૭૬-૯૪ ॥
- ॥ આકાશભૈરવકલ્પમ્ । અધ્યાયઃ ૭૯॥
- ॥ વીરમાહેશ્વરાચારસઙ્ગ્રઃ । દ્વિતીયભાગઃ । અધ્યાયઃ ૧૭। ૯૪-૧૧૧ ॥

Notes:
sharabhastotram appears
as nRisimha uvAcha in li NgapurANam (vedavyAsa)
and texts including AkAshabhairavakalpam,
vIramAheshvarAchArasaMgrahaH etc.
See sharabheshvaraShTottarashatanAmastotram
for an alternative version with Marathi
meaning.

The core stotram is given here with variations
found in the referenced source texts. The shlokas
have been re-numbered adapting to the core

stotram flow.

The phalashruti amongst these texts differs in length (and hence in description).

Readers may visit the respective texts for referring to the required preceding (viniyoga, dhyanam etc) and concluding (phalashruti etc.) parts.

Encoded by Sivakumar Thyagarajan Iyer
Proofread by Sivakumar Thyagarajan Iyer, Psa Easwaran psaeaswaran, Ruma Dewan

---

*Sharabhastotram by Shri Nrisimha from Lingapurana*
pdf was typeset on March 28, 2023

Please send corrections to *sanskrit@cheerful.com*